# साधनसमुद्देशे गजसूत्रदिशा कर्मकर्तृविमर्शः

डॉ. सजनगुहः
संस्कृतविभागः, रायगञ्जविश्वविद्यालयः, पश्चिमबङ्गः

**भूमिका-** कर्मादिकारकान्तराणां स्वव्यापारे विवक्षाकृतं कर्तृत्वं कर्तुः प्रैषविनियोगात्पूर्वमेव स्यात्। कर्मणः कर्तृत्वं कीदृग् भवति तद्विषये रोचकस्तत्वानि दृश्यन्ते वैयाकरणनये। मुख्यतो धातोश्चतुष्टयं विद्यते। कर्मस्थभाव-कर्मस्थक्रिया-कर्तृस्थक्रिया-कर्तृस्थभावश्च। तेषु कर्मस्था क्रिया यस्याः सा कर्मस्थक्रिया। यथा-लुनाति केदारं देवदत्तः। कर्मस्थो भावो यस्य स कर्मस्थभावः। यथा- पच्यते ओदनः स्वयमेव। अर्थाद्यदा राम ओदनार्थं तण्डुलान् पाचयति तदा पाचनकार्ये उपकाराय साधनसामग्रीसंग्रहविषये च यत्नवान् भवति। तदनन्तरं चुल्यामुपरि तण्डुलेन सह स्थाल्या आरोपकार्ये एव रामस्य कर्तृत्वमपेक्ष्यते। अतःपरं रामस्य निवृत्तिः। तस्य निवृत्तिदशायामपि पाककार्ये तण्डुलस्य विक्लेदने न कोऽपि प्रतिबन्धकः। पाककार्ये कारकान्तराणां विनियोग एव रामस्य प्रधानव्यापारः। विनियोगानन्तरं तस्यापगते न कोऽपि बाधको दृश्यते। कर्तृस्थभावो यथा- देवदत्तः चिन्तयति। कर्तृस्थक्रिया यथा-देवदत्तो ग्रामं गच्छति। अत्र गमनादिव्यापारो ग्रामे न दृश्यते परन्तु कर्तरि देवदत्ते एव। अष्टाध्याय्यां पाणिनिना कर्मकर्तृविषये सूत्रं व्यरचि यत्-"कर्मवत्कर्मणा तुल्यक्रियः"[1] इति। सूत्रमिदं कर्मस्थभावे कर्मस्थक्रियायाञ्च विद्यते। पुनः पाणिनिना अष्टाध्याय्यां "णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने"[2] इति सूत्रेण कर्तृस्थभावे तथा च कर्तृस्थक्रियायां णिचि कर्मणः कर्तृत्वं प्रासेधि। सूत्रमिदं गजसूत्रमिति नाम्ना प्रसिद्धम्।

**कूटशब्दाः-** गजसूत्रम्, अवस्थाचतुष्टयम्, पञ्चम्यवस्था

➤ ***णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने इति सूत्रदिशा कर्मकर्तृविमर्शः-***

सूत्रस्य वाक्यचतुष्टयं वर्तते। तत्र प्रथमं वाक्यं 'णेः आत्मनेपदम्' इति। अत्र ण्यन्तादात्मनेपदं स्यात्। द्वितीयस्य 'अणौ यत् कर्म णौ चेत्' इति वाक्यस्यार्थः अणौ यत् कर्म तदेव ण्यन्तावस्थायां चेदुच्यते तदा आत्मनेपदं स्यात्। तृतीये 'स कर्ता' इति वाक्ये तत्कर्म एव णौ कर्ता स्यात्। चतुर्थे अनाध्याने इति। न तु ध्याने। आध्यानन्तु उत्कण्ठापूर्वकं स्मरणम्। अतस्तद्भिन्नार्थे अनाध्याने आत्मनेपदं स्यात्। तस्मात् सूत्रस्य सम्पूर्णोऽर्थो भवति अणौ यत्कर्म तदेव णौ कर्ता स्यात्तर्हि ण्यन्ताद्धातोरात्मनेपदं स्यादुत्कण्ठापूर्वकस्मरणभिन्नोऽर्थे। यथा- अण्यन्ते- पश्यन्ति भृत्या राजानम्। ण्यन्ते- दर्शयते राजा स्वयमेव। कर्तृस्थभावे तथा च कर्तृस्थक्रियायामात्मनेपदविधाना-र्थमेव अस्य सूत्रस्य प्रासङ्गिकता विद्यते। अत्रापि कर्मणः कर्तृत्वं दृश्यते इति हेतोः कर्मकर्तृविचारे सूत्रस्य प्रयोजनीयता वर्तते। वाक्यपदीयेऽपि कर्मकर्तृविचारयितुं भगवता भर्तृहरिणा महाभाष्यमनुसृत्य स्ववक्तव्यं प्राणायि। अतस्तद्विषये आलोचनायाः आवश्यकता विद्यते।

- ***रुह्-धातौ कर्मकर्तृविमर्शः-*** तत्र शुद्धे रुहौ योऽर्थः प्रतीयते ण्यन्ते रुहौ अपि सोऽर्थः प्रतीयते। यतोहि शुद्धे रुहौ न्यग्भवनं न्यग्भावनञ्चेत्यर्थद्वयं विद्यते। तथा च प्रसृतेयं कारिका-

---

[1] पाणिनिसूत्रम्- ३।१।८७

[2] तत्रैव- १।३।६७

न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते।
न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते॥ [3]

अत्र शुद्ध-रुह्-धातुना सह णिचा रुह्-धातुना अवस्थाचतुष्टयं विद्यते। यथा-आरोहन्ति हस्तिनं हस्तिपका इति प्रथमोऽवस्था। आरोहति हस्ती स्वयमेव इति द्वितीयोऽवस्था। आरोहयन्ति हस्तिनं हस्तिपका इति तृतीयोऽवस्था। आरोहयते हस्ती स्वयमेव इति चतुर्थोऽवस्था।

♦ ***प्रथमोऽवस्था-*** आरोहन्ति हस्तिनं हस्तिपकाः। अत्र केवलं रुह्-धातुः। अस्यार्थो न्यग्भवनानुकूलो न्यग्भावनाव्यापारः। तत्र न्यग्भावनं मुख्यव्यापारः। न्यग्भवनन्तु गौणः। अत्र एकैव अवस्था रुह्-धातुना प्रतिपादिता। यतोहि अत्र णिचा प्रतिपादिता प्रेरणावस्था नास्ति। अतो न्यग्भवन्तं न्यग्भावयन्तीति रुहि वर्तते इति हेलाराजेन निरमायि यथा-"आरोहन्ति हस्तिनं हस्तिपका इत्यत्र न्यग्भवन्तं न्यग्भावयन्तीत्यर्थः"[4] इति। काशिकावृत्त्यां पदमञ्जर्यामपि हरदत्तेन पर्यपोषि यथा-"आङ्-पूर्वो रुहिः न्यग्भवनोपसर्जने न्यग्भावने वर्तते, न्यग्भवन्तं हस्तिनं न्यग्भावयतीत्यर्थः"[5] इति। अतः अर्थद्वयं प्रतिपद्यते। अर्थादारोहन्ति हस्तिनं हस्तिपका इति प्रथमोऽवस्थायां न्यग्भावनं न्यग्भवनञ्चार्थद्वयम् अवस्थापदवाच्यमिति अराटि रघुनाथशर्मणा यथा-"आरोहन्ति हस्तिनं हस्तिपकाः इति प्रथमकोटौ न्यग्भवनं न्यग्भावनञ्चेति अर्थद्वयमवस्थापदवाच्यम्"[6] इति। एवमत्र अर्थद्वयस्य प्रतिपादने एव रुह्-धातोः सार्थकता दृश्यते। तथा चाह हेलाराजो यथा-"अत्र च धात्वर्थमात्रप्रदर्शने तात्पर्यम्"[7] इति। अत्र यद्यपि अर्थद्वयं विद्यते तथापि रुह्-धातुना प्रतिपादिता एकैव अवस्था परिदृश्यते। अत्र प्रथमोऽवस्थायां भावो विद्यते यत्-हस्तिनः पृष्ठदेशे चारोहणकार्ये रुह्-धातोर्गमनानुकूलो गात्रविक्षेपादिव्यापारः प्रतिपद्यते। अत्र उपरिभागे आक्रमणस्यानुकूलस्य न्यग्भवनाया अनुकूलः अङ्कुशपातादिव्यापारः। उपरिभागे आक्रमणस्य अनुकूलं न्यग्भवनमत्र फलम्। न्यग्भवनं हस्तिनि अन्तर्गतम्। अतः तदाश्रयत्वाद्धस्ती कर्म। न्यग्भावनञ्च हस्तिपके अन्तर्गतत्वाद् व्यापाराश्रयत्वाच्च हस्तिपकाः कर्तारः। हस्ती न्यग्भवति हस्तिपकस्तं हस्तिनं तस्मिन् व्यापारे प्रेरयति। अतः प्रथमे न्यग्भावनं न्यग्भवनञ्चार्थद्वयं रुहावान्तर्गतम्। अत्र अर्थद्वयात्मिकाऽवस्था एकेन रुह्-धातुना समूहरूपेण प्रतिपादितेत्याशयः। तथा च दृश्यते अम्बाकर्त्र्यां यथा-"ततश्च प्रथमकोटौ अर्थद्वयात्मिका एकैवावस्था एकेन धातुना समूहरूपेण प्रतिपाद्यत्वात्"[8] इति।

♦ ***द्वितीयोऽवस्था-*** यदा न्यग्भावनारूपप्रैषस्याभावो विद्यते तथा तेनैव रुह्-धातुना केवलं न्यग्भवनरूपमेकोऽर्थो जायते। अत्रापि न्यग्भवनरूपमेकार्थेन सह केवलं रुह्-धातुना प्रतिपादिता एकैवावस्था दृश्यते। तथाच प्रेरणाभावे आरोहति हस्ती स्वयमेव इति प्रयोगो द्वितीयोऽवस्थायां विद्यते इति राराज्यते अम्बाकर्त्र्यां यथा-"द्वितीयकोटौ तु एकार्थरूपा एकैवावस्था, एकधातुप्रतिपाद्या च"[9] इति। एवं यथा प्रथमोऽवस्थायां न्यग्भवन्तं न्यग्भावयन्तीत्यर्थो रुहि विद्यते तद्वद्द्वितीयेऽपि केवलं न्यग्भवनं रुहि

---

[3] साधनसमुद्देशे पदकाण्डे कारिका- ५९।

[4] तत्रैव, प्रकीर्णप्रकाशे- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[5] काशिकावृत्तिः पदमञ्जरी-१।३।६७।पृ. ७३। सम्पा. जयशङ्करलालत्रिपाठी-सुधाकरमालवीयः, भा. २।

[6] साधनसमुद्देशे पदकाण्डे अम्बाकर्त्री- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[7] तत्रैव, प्रकीर्णप्रकाशे-५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[8] तत्रैव, अम्बाकर्त्री- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[9] तत्रैव, अम्बाकर्त्री- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

वर्तते इति सम्प्रादायि रघुनाथशर्मणा यथा-"आरोहति हस्ती स्वयमेव इति द्वितीयकोटौ तु न्यग्भवनमात्रमर्थोऽवस्थापदवाच्यः"[10] इति। तथा चोक्तं हरदत्तेन यथा-"यदा तु हस्तिनः सौकर्यातिशयप्रतिपादनाय हस्तिपकव्यापारो न विवक्ष्यते, तदा न्यग्भावमात्रे रुहिर्वर्तते, तत्र च हस्तिनः कर्तृत्वम्"[11] इति।

♦ ***तृतीयोऽवस्था-*** न्यग्भवनं न्यग्भावनञ्चेति अर्थद्वयं ण्यन्तावस्थायां रुहि अपि वर्तते। यथा- आरोहयन्ति हस्तिनं हस्तिपकाः। अत्र प्रेषणस्य विवक्षायां णिचि प्रकृतेन रुह्-धातुना सह यथा अर्थद्वयं विद्यते न्यग्भावनं न्यग्भवनरूपञ्च तद्वदवस्थाद्वयमपि विद्यते। अर्थादिकत्र रुह्-धातुना प्रतिपादिता अवस्था अन्यत्र णिचा प्रतिपादिता प्रेरणावस्था समूहरूपेण दृश्यते इति नयनगोचरी भवति अम्बाकर्त्र्यां यथा-"तृतीयकोटौ तु णिच् तत्प्रकृतिप्रतिपाद्यमर्थद्वयमवस्थाद्वय-रूपम्"[12] इति।

♦ ***चतुर्थोऽवस्था-*** पुनश्च यदा प्रेरणस्याभावो विद्यते तदा केवलं णिच्-प्रकृतिरुह्- धातुना प्रतिपादिता एकार्थरूपा एकैवावस्था दरीदृश्यते। तथा च प्रयोगोऽयं यथा-आरोहयते हस्ती स्वयमेव। अत्र हस्ती कर्तृत्वेन विवक्षायां न्यग्भवनकार्ये सुशिक्षितत्वात्सौकर्यातिशयबलान्निवृत्तिप्रेषणे च ण्यन्तेन रुह्-धातुना न्यग्भवनमात्ररूपं व्यापारमेकं सम्पादयति। अत्र यद्यपि प्रेरणस्य निवृत्तिर्भवति तथापि रुह्-धातोः यो न्यग्भवनानुकूलव्यापाररूपः स्वाभाविकोऽर्थस्तत्रैव णिच्-युज्यते। अतोऽत्र प्रयोजकप्रयोज्यभावरहिते सति णिचो निवृत्तिर्न भवति। यतोहि उपायस्य निवृत्तावपि उपेयस्य निवृत्तिर्न भवति। तथाच निरमायि कैयटेन यथा-"न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो निवृत्तिः, उपायनिवृत्तावप्युपेयानिवर्तनात्"[13] इति। यथा- देवदत्त ओदनं पचति। अत्र पाकायोपयुक्तानां साधनान्तराणां विनियोगादिव्यापाराणामनन्तरं देवदत्तस्य निवृत्तावपि तानि तानि साधनानि मुख्यकर्तुरभावेऽपि स्वव्यापारान्न निर्वतन्ते। अतः 'पच्यते ओदनः स्वयमेव' इति प्रयोगः। अत्र यद्यपि मुख्यप्रयोजकव्यापारस्य निवृत्तिस्तथापि साधनान्तरेष्वपि तद्व्यापारस्यारोपणादेव अनिवृत्तिरित्याशयः। तथा इहापि निवृत्तौ सति प्रयोज्यप्रयोजकव्यापारे णिचोऽनिवृत्तिः। एतन्मतं संसाधयन्नागेशोऽपि भाष्योद्द्योते व्यरचयद्यत्-"मुख्यप्रयोजकव्यापारनिवृत्तावपि स्वव्यापारे एव तत्त्वारोपात्तदनिवृत्तिरिति भावः"[14] इति। काशिकावृत्तौ न्यासेऽपि जिनेन्द्रबुद्धियतिना विन्ययोजि यत्-"न च प्रयोज्यप्रयोजकभावे निवृत्तेऽपि णिचो निवृत्तिर्भवति, निवृत्तिकारणाभावात्। यथैव हि देवदत्तस्य व्यापारे निवृत्तेऽपि पचिः पाकान्न निवर्तते-पच्यत ओदनः स्वयमेवेति तथेहापि निवृत्ते प्रयोज्यप्रयोजकव्यापारे णिचो निवृत्तिर्न भवतीति वेदितव्यम्"[15] इति। एतन्मतं हरिणोक्तं यत्-"निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे

---

[10] तत्रैव, अम्बाकर्त्री- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[11] काशिकावृत्तिः पदमञ्जरी-१।३।६७।पृ. ७३। सम्पा. जयशङ्करलालत्रिपाठी-सुधाकरमालवीयः, भा. २।

[12] साधनसमुद्देशे पदकाण्डे अम्बाकर्त्री- ५९-६०। पृ. १९८। सम्पा. रघुनाथशर्मा, भा. २।

[13] महाभाष्ये प्रदीपः- (१ अ.।३ पा.।२ आ.।सू. ६७)। पृ. १७८। सम्पा. भार्गवशास्त्रीजोशी, ख. २।

[14] तत्रैव, उद्द्योतः- (१ अ.।३ पा.।२ आ.।सू. ६७)। पृ. १७९। सम्पा. भार्गवशास्त्रीजोशी, ख. २।

[15] काशिकावृत्तिः न्यासे-१।३।६७।पृ. ७२। सम्पा. जयशङ्करलालत्रिपाठी-सुधाकरमालवीयः, भा. २।

णिजुच्यते"[16] इति। एवमत्र अवस्थाचतुष्टयं विद्यते। अत्र भर्तृहरिणा चतुर्थोऽवस्थात ऊर्ध्वा एकैव पञ्चम्यवस्थाऽपि स्वीकृता। सा कथमिति विषये आलोचनाया अवकाशो विद्यते।

- *अवस्थां पञ्चमीमाहुर्ण्यन्ते-* आदौ अवस्थाचतुष्टयं दर्शितम्। न तत्र पञ्चमी कक्ष्या अस्तीति। परन्तु अरोहयते हस्ती स्वयमेव इति कथनेन तु पञ्चम्यवस्था न्यरूपि भर्तृहरिणा। एवं यदीयमवस्थैव पञ्चमी तर्हि चतुर्थ्यवस्था का भवतीति शङ्का जायते। अस्याः शङ्काया निराकरणेनैव कक्ष्याद्वययोः पार्थक्यं निरूप्यते। अयं भावो यथा- आरोहन्ति हस्तिनं हस्तिपका इति प्रथमोऽवस्थायां फलव्यापारात्मिको एकैवावस्थासम्पन्नः शुद्धरुह्-धातुरेव। आरोहति हस्ती स्वयमेव इति द्वितीयोऽवस्थायां केवलं व्यापारव्यधिकरणफलात्मकशुद्धरुह्-धातुः। तत आरोहयन्ति हस्तिनं हस्तिपका इति ण्यन्तेन तृतीयोऽवस्था। अत्र फलव्यापारात्मिकोऽवस्थाद्वय-सम्पन्नो णिजन्तो रुह्-धातुर्विद्यते। तत आरोहयते हस्ती स्वयमेव इति या अवस्था णिचा प्रतिपादिता केवलं हस्तिव्यापाररूपा सैव चतुर्थ्यवस्था। अत्र कर्महस्ती कर्ता भवति। अत्रैव व्याख्यानकौशलवशात् पञ्चम्यवस्थापि अन्तर्भाविता। अर्थादारोहयते हस्ती स्वयमेव इत्यादावेव अवस्थाद्वयं विद्यते। तत्र प्रथमं णिजर्थस्याविवक्षारूपा एकावस्था। सैव अत्र चतुर्थ्यवस्थात्वेन व्यवह्रियते हरिणा। अपरा च णिच्-प्रत्ययस्य प्रकृत्या रुह्-धातुना प्रतिपादिता हस्तिमात्रव्यापाररूपा कर्मकर्तर्यवस्थाविशेषा। सेयमवस्थैव हरिणा कथिता पञ्चम्यवस्था। तथा च प्राणायि हेलाराजेन प्रकीर्णप्रकाशे यथा- "इहारोहयते हस्ती स्वयमेवेत्ययं हस्तिव्यापाराभिधायी प्रयोगोऽस्ति कर्मकर्तृविषयः"[17] इति। रघुनाथशर्मापि अम्बाकर्त्र्यां बभाषे यत्-"लोके आरोहयते हस्ती स्वयमेवेत्ययं न्यग्भवनरूपहस्तिव्यापाराभिधायी कर्मकर्तरि प्रयोगोऽस्ति प्रसिद्धः"[18] इति। अतः कर्मकर्तरि सैवावस्था ण्यन्ते पञ्चमीत्याख्यायते इति हरिणा अभिसमधायि यथा-"अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि"[19] इति। सेयं पञ्चम्यवस्था नागेशेन महाभाष्यस्योद्द्योते प्राकाशि यथा- "द्वितीयकक्षायां फलसामानाधिकरणो व्यापारोऽर्थस्ततो णिचि तृतीया कक्षा। ततो णिजर्थव्यापारस्य प्रकृत्यर्थस्य फलसामानाधिकरणव्यापारस्य च त्यागे चतुर्थी कक्ष्या। ततः फलसामानाधिकरणे व्यापारे प्रवर्तनात्वेन विवक्षिते णिच्युदाहरणभूतायाः पञ्चमीत्वम्"[20] इति। एवं पञ्चम्यन्तं सोपानं प्राप्त्यर्थं ततः पूर्वं सोपानचतुष्टयम् आवश्यकम्। सोपानस्थानीया एषा क्रमानुसारिणी भूमि अपोद्धारेण तथा चान्वाख्यानेन लक्षितां प्रायोगिकपञ्चमीभूमिं प्राप्नोति। एताश्च भूमयोऽवस्थापदवाच्याः। ता एव कक्षेति पदेन अभिधीयन्ते। यथा बहुकक्षाविशिष्टस्य प्रासादस्य अन्तरालभाविनः कक्षा दृश्यन्ते तथात्र पञ्चमीभूमिपर्यन्तं कक्षान्तरवदन्तरालभाविन्यो भूमयोऽपि सन्तीति सरलार्थः। तथा च हेलाराजो न्यगदीद्यथा-"तथा च यावतीषु सोपानस्थानीयासु अर्थविभागभूमिषु पदं विन्यस्येयं प्रायोगिकी पर्यन्तभूमिः प्राप्यते ता अन्तरालभाविन्यो गण्यमाना भूमयोऽवस्थाशब्दवाच्याः"[21] इति। रघुनाथशर्मापि चकाण यथा- "तथा च यावतीषु सोपानस्थानीयासु अर्थविभागभूमिकासु पदं विन्यस्येयं प्रायोगिकी पर्यन्तभूमिः प्रासादोपरितलवत्प्राप्यते ता अन्तरालभाविन्यो गण्यमाना

---

[16] साधनसमुद्देशे पदकाण्डे कारिका-६०।

[17] तत्रैव, प्रकीर्णप्रकाशे- ५९-६०। पृ. १९७। सम्पा. रघुनाथशर्मा, भा. २।

[18] तत्रैव, अम्बाकर्त्री- ५९-६०। पृ. १९९। सम्पा. रघुनाथशर्मा, भा. २।

[19] तत्रैव- ६०।

[20] महाभाष्ये उद्द्योतः- (१ अ.।३ पा.।२ आ.।सू. ६७)। पृ. १७९। सम्पा. भार्गवशास्त्रीजोशी, ख. २।

[21] साधनसमुद्देशे पदकाण्डे प्रकीर्णप्रकाशे- ५९-६०। पृ. १९७। सम्पा. रघुनाथशर्मा, भा. २।

भूमयोऽवस्थाशब्दवाच्याः"[22] इति। महाभाष्यस्योद्द्योतटीकायां नागेशेनापि प्राणायि यथा- "यावतीषु सोपानस्थानीयास्वर्थविभागभूमिषु पदं विन्यस्येयं प्रायोगिकी पर्यन्तभूमिः प्राप्यते ता अन्यरालभाविन्यो गम्यमाना भूमयोऽवस्थाशब्देनोच्यन्ते"[23] इति। लघुशब्देन्दुशेखरे तेनैव महोदयेन न्यरूपि यत्-"यावतीषु सोपानस्थानीयास्वर्थविभागभूमिषु पदं विन्यस्येयं प्रायोगिकी भूमिः प्राप्यते ता भूमयः कक्ष्या इत्युच्यन्तेऽवस्थेति च"[24] इति।

➢ ***निष्कर्षः*- प्रथमोऽवस्था- आरोहन्ति हस्तिनं हस्तिपकाः-**

1. रुह्-धातुः- अर्थः (न्यग्भवनम्-न्यग्भावना)
2. न्यग्भवनानुकूलो न्यग्भावनाव्यापारः-न्यग्भवन्तं न्यग्भावयन्ति-अत्र प्रेरणा अस्ति। परन्तु णिचा प्रतिपादिता प्रेरणा नास्ति।
3. रुह्-धातुना केवलमेकैव अवस्था दृश्यते। यतोहि णिचा प्रतिपादिता अवस्था अत्र नास्ति।
4. रुह्-धातुः पलव्यापारात्मिकः। यतोहि फलव्यापारयोः अस्य शक्तिर्वर्तते।
5. अत्र धातोः स्वाभाविकोऽर्थो न्यग्भवनम्। यतोहि धातुना ऊर्ध्वदेशसंयोगानुकूलव्यापाररूपस्य अर्थस्य प्रकाशो भवति। अतः अधःदेशे न्यग्भवनं भवति हस्तिनः। तदा तस्य पृष्ठदेशे आरोहणकार्यं सहजसाध्यं भविष्यति। अतः रुह्-धातोः न्यग्भवनरूपार्थे एव द्वितीयोऽवस्थायां रुह्-धातोः प्रयोगो भविष्यति।

**द्वितीयोऽवस्था- आरोहति हस्ती स्वयमेव-**

1. रूह्-धातु-न्यग्भवनमर्थः-न्यग्भवति-केवलं फले शक्तिर्वर्तते।
2. रुह्-धातुना केवलमेकैव अवस्था दृश्यते। यतोहि णिचा प्रतिपादिता अवस्था अत्र नास्ति।
3. धातुना प्रतिपादितं फलं कर्तृव्यापारव्यधिकरणं परन्तु हस्तिव्यापारसामानाधिकरणम्। नागेशमते- द्वितीयकक्षायां फलसामानाधिकरणो व्यापारः इति। न्यग्भवनं केवलं हस्तिनो व्यापारः।
4. न्यग्भवनरूपार्थे एव तृतीयकक्षायां णिच्-प्रत्ययो भवति। अन्यथा पञ्चमकक्षायां णिचः प्रकृतेः रुह्-धातोः न्यग्भवनार्थस्य प्रतीतिर्न जायते।

**तृतीयोऽवस्था- आरोहयन्ति हस्तिनं हस्तिपकाः-**

1. रुह्-धातुः पलव्यापारात्मिकः। यतोहि फलव्यापारयोः अस्य शक्तिर्वर्तते।
2. अवस्थाद्वयम्। रुह्-धातुना प्रतिपादिता अवस्था। णिचा प्रतिपादिता अवस्था। अत्र प्रेरणार्थे णिच्।
3. न्यग्भावयन्तं न्यग्भावयन्ति।
4. न्यग्भवनार्थे णिच्। नागेशमते- ततो णिचि तृतीया कक्ष्या इति। अत्र ततः इति पदेन न्यग्भवनार्थो बोध्यते।

**चतुर्थोऽवस्था- आरोहयते हस्ती स्वयमेव-**

1. न्यग्भवनार्थः- केवलं फलमस्ति। न्यग्भवति।
2. णिच्-नास्ति। अत्र प्रयोजकव्यापारो नास्ति। केवलं हस्तिनिष्ठव्यापारोऽस्ति।

**अवस्था पञ्चमीमाहुर्ण्यन्ते- आरोहयते हस्ती स्वयमेव-**

1. अत्र न्यग्भवनानुकूलव्यापारे प्रेरणा विद्यते। णिच्-अस्ति।
2. फलसामानाधिकरणव्यापारो हस्तिनि विद्यते। हस्ती कर्मकर्ता।
3. अत्र हस्तिनिष्ठन्यग्भवनव्यापारस्यैव प्राधान्यता विद्यते हस्तिपकनिष्ठन्यग्भावनापेक्षया। अर्थात् न्यग्भावनोपसर्जनपूर्वकन्यग्भवनम्। नागेशमते- ततः फलसामानाधिकरणे व्यापारे प्रवर्तनात्वेन

---

[22] तत्रैव, अम्बाकर्त्री- ५९-६०। पृ. १९९। सम्पा. रघुनाथशर्मा, भा. २।

[23] महाभाष्ये उद्योतः- (१ अ.।३ पा.।२ आ.।सू. ६७)। पृ. १७९। सम्पा. भार्गवशास्त्रीजोशी, ख. २।

[24] लघुशब्देन्दुशेखरे कारकप्रकरणे-१।३।६७। पृ. ६८८। सम्पा. गोपालशास्त्री नेने, भा. २।

विवक्षिते णिच्युदाहरणभूतायाः पञ्चमीत्वम्। अर्थात् हस्ती स्वयमेव न्यग्भवति। अत्र प्रयोजकव्यापारो हस्तिनिष्ठः। स व्यापारो णिचा कथितः।

**सन्दर्भसूची-**


- पतञ्जलिविर्निर्मितं व्याकरणमहाभाष्यम, भाष्यप्रदीपोद्योतसमुल्लसितम् (द्वितीयं खण्डम्)- (सम्पादकः) भार्गवशास्त्रीजोशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, पुनर्मुद्रितसंस्करणम् २०१८।
- भर्तृहरेः वाक्यपदीयम्, प्रकाश-अम्बाकर्त्रीव्याख्ययोपेतम् (तृतीयं काण्डम्, द्वितीयो भागः) - (सम्पादकः) श्रीरघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, संस्करणम् ३, २०१६।
- *महामहोपाध्यायभट्टनागेशकृतो लघुशब्देन्दुशेखरः(चन्द्र कलया टीकया समेतः)* गोपालशास्त्रीनेने, चौखम्भा संस्कृत संस्थान, वाराणसी, भा. १-२, सं. पु. मु. २०१६।
- *श्रीमद्वामन-जयादित्यविरचिता पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका(न्यास-पदमञ्जरी-भावबोधिनी-सहिता)*- जयशंकरलालत्रिपाठी- सुधाकरमालवीय, तारा बुक एजेंसी, वाराणसी, भा. २, सं. पु. मु. २०१८।



**डॉ. सजनगुहः**

**संस्कृतविभागः, रायगञ्जविश्वविद्यालयः, पश्चिमबङ्गः**